# Ambarishakritam Vishnu Stotram

# અમ્બરીષકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Ambarishakritam 2 Vishnu Stotram

File name : ambarIShakRRitaM2viShNustotram.itx

Category : vishhnu, viShNu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 5/37-48||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# અમ્બરીષકૃતં વિષ્ણુસ્તોત્રમ્

અમ્બરીષ ઉવાચ ।
પ્રસીદ દેવ સર્વાત્મન્નસઙ્ખ્યેયશિરોભુજ ।
અસઙ્ખ્યઘ્રાણનયનપાણિપાદ નમોઽસ્તુ તે ॥ ૩૭॥

ષટ્ત્રિંશત્તત્ત્વાતીતોઽસિ નિષ્પ્રપઞ્ચ પ્રપઞ્ચકઃ ।
ચતુર્વિધજગદ્ધામ વિશ્વમૂર્તે નમોઽસ્તુ તે ॥ ૩૮॥

એકપાદસ્ત્રિપાદશ્ચ તીર્થપાદોઽતરિક્ષપાત્ ।
યસ્ય પાદોદ્ભવા ગઙ્ગા પુનાતિ ભુવનત્રયમ્ ॥ ૩૯॥

બ્રહ્મહત્યાદિપાપાનાં શોધકં યસ્ય નામ વૈ ।
કીર્તિતં સર્વશુભદં નમસ્તસ્મૈ શુભાત્મને ॥ ૨.૫.૪૦॥

દેવ ત્વન્નામકીર્ત્યાપિ જાયન્તે સર્વસિદ્ધયઃ ।
કૌતુકાત્ત્વાં હિ મૃગ્યન્તિ વિદ્વાંસો બુદ્ધિશાલિનઃ ॥ ૪૧॥

નાથ ત્વત્પાદસલિલં સંશ્રયાત્તાપહારકમ્ ।
તાપત્રયાભિભૂતસ્ય ભક્તિં મેઽત્ર દૃઢાં કુરુ ॥ ૪૨॥

અનન્યસ્વામિનો મેઽદ્ય નાસ્ત્યન્યત્પ્રાર્થનીયકમ્ ।
પ્રણિપત્ય જગન્નાથ ત્વાં પ્રયાચે સહસ્રધા ॥ ૪૩॥

સમસ્તપુરુષાર્થસ્ય બીજં ત્વત્પાદપઙ્કજે ।
યાવત્પ્રાણાન્ધારયામિ તાવદ્ભક્તિર્દૃઢાસ્તુ મે ॥ ૪૪॥

સૃષ્ટિં વિનિર્મમે યેમાં યયા ભક્ત્યા પિતામહઃ ।
સંહરત્યખિલં રુદ્રો લક્ષ્મીશ્ચૈશ્વર્યદાયિની ॥ ૪૫॥

દીનાનુકમ્પિંસ્તાં ભક્તિં પ્રાર્થયે નાન્યમાનસઃ ।
અનાદ્યવિદ્યાપઙ્કેઽસ્મિન્સુદૃઢે દુસ્તરં ભૃશમ્ ॥ ૪૬॥

નિમગ્નસ્ય જગન્નાથ નિરાલમ્બં પ્રણશ્યતઃ ।

મહામહિમ્નસ્ત્વદ્ભક્તેર્નાન્યદસ્તિ પરાયણમ્ ॥ ૪૭॥

શ્રુતિસ્મૃત્યાદિસમ્ભિન્નમાર્ગાઃ સમ્મોહહેતવઃ ।
ત્વદ્ભક્તિમપહાયેતે ન પ્રવર્ત્તિતુમીશ્વરાઃ ॥ ૪૮॥

અનન્યશરણં સ્વામિન્નનુકમ્પય માં વિભો ।
ઇતિ સ્તુવઞ્જગન્નાથપાદપદ્માન્તિકે મુદા ॥ ૪૯॥

પપાત દણ્ડવદ્ભૂમૌ પ્રસીદેતિ વદન્મુહુઃ ॥

ઇતિ શ્રીસ્કન્દપુરાણે વૈષ્ણવખણ્ડે પુરુષોત્તમજગન્નાથમાહાત્મ્યે
પઞ્ચમાધ્યાયાન્તર્ગતં અમ્બરીષકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । વૈષ્ણવખણ્ડ । પુરુષોત્તમખણ્ડ । અધ્યાય ૫/૩૭-૪૮॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 5/37-48..

Proofread by PSA Easwaran

---

*Ambarishakritam Vishnu Stotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*